देवप्रयागस्थ-श्रीरघुनाथकीर्तिपरिसरस्य त्रैमासिकी वार्तापत्रिका

# रघुनाथवार्तावली

## अन्ताराष्ट्रिय-राष्ट्रिय-सङ्गोष्ठी-विशेषाङ्कः

द्वितीयवर्षम् ( २०१८ ) ७-८ अङ्कौ जनवरी-मार्च, अप्रैल-जून २०१८




नानाविषयसम्बद्धाः नानारसपरिप्लुताः।
परिसरीयवार्तास्ताः वार्तावल्यां प्रकाशिताः।।

रघुनाथवार्तावली कृपया श्रीरघुनाथस्य प्रसरेत्।
दिशि दिशि प्रापयेदथ वार्ताः परिसरस्याभिनवाः।।

**प्रधानसम्पादकः**

**प्रो. के.बी. सुब्बरायुडुः**

**( प्राचार्यः )**

**सम्पादकौ**

**प्रो. बनमालीबिश्वालः**

**डा. प्रफुल्लगडपालः**


'रघुनाथवार्तावली'-सम्बद्धमभिप्रायम्, प्रकाशनयोग्याः कार्यक्रमवार्ताः च अधोलिखित-ई.मेल् सङ्केतेन प्रेषयन्तु-
srkvarta@gmail.com

परिसरस्य जालपुटेऽपि रघुनाथवार्तावली द्रष्टुं शक्यते-
website : www.srkcampus.org


देवप्रयागस्थ-श्रीरघुनाथकीर्तिपरिसरस्य त्रैमासिकी वार्तापत्रिका

# रघुनाथवार्तावली

प्रकाशकः

राष्ट्रियसंस्कृतसंस्थानम्

**श्रीरघुनाथकीर्तिपरिसरः**

देवप्रयागः, पौडी-गढवालः

उत्तराखण्डः-249 301

(दूरभाषः - 01378-266028)

email : srkcampus@gmail.com

website : www.srkcampus.org


## पुरोवाक्



श्रीरघुनाथकीर्तिपरिसरः द्वितीये एव वर्षे विविध-गतिविधीनां सम्पादने सन्नद्धोऽस्ति। तत्क्रमे रघुनाथवार्तावल्याः सप्तमाष्टमाङ्कविशिष्टो नवीनः संयुक्ताङ्कः अन्ताराष्ट्रिय-राष्ट्रियसङ्गोष्ठीविशेषाङ्करूपेण लोकाय अर्प्यते। एवमेव अत्रत्य-विविधविभागीय-पत्रिकाणाम् अग्रिमाङ्कानां प्रकाशनमपि सुनिश्चितम् इति परिसरस्य कृते कश्चन गौरव-प्रसङ्गः। परिसरे ०१.०२.२०१८ तः १०.०२.२०१८ दिनाङ्कं यावद् विविधविभागीया अन्ताराष्ट्रियाः राष्ट्रियाश्च सङ्गोष्ठ्यः सम्पन्नाः। एवमेव विविधविभागीया विशिष्टव्याख्यानमाला अपि तदवसरे समायोजिता अभूवन्। तत्र प्रसिद्धाः विद्वांसः तत्तच्छास्त्रीयविषयान् अधिकृत्य व्याख्यानानि प्रायच्छन्। एतेन कार्यजातेन संस्कृतशास्त्रीयशोधपरम्परायां कश्चन नूतन एव मार्गः समुद्घाटितः।

यथा सर्वे जानन्ति परिसरस्य प्रमुख-शैक्षणिकगतिविधिषु शोध-संगोष्ठी-प्रकाशनान्यपि उल्लेखमर्हन्ति। तत्तद्विभागा न केवलं प्राक्शास्त्रि-शास्त्रि-आचार्य-विद्यावारिधि(पीएच.डी.)-उपाध्यर्थं पारम्परिकशिक्षणे किन्तु आधुनिक-शोध-संगोष्ठी-प्रकाशनादि-कर्मस्वपि स्वकीयं योगदानं सुतरां सुनिश्चयन्तीत्यन्तः विभागीय-प्राध्यापकान् साधुवादैः सभाजयामि। एवमस्याः पत्रिकायाः परवर्तिनोऽङ्काः अपि एतादृशीभिरुत्तमाभिः सामग्रीभिः लोकलोचनमलंकुर्वन्त्विति कामयमानो सम्पादकाभ्यां प्रो. बनमालीबिश्वाल-डा. प्रफुल्लगडपालाभ्यां धन्यवादान् प्रदाय विरमामि विस्तरादिति शम्।

**के.बी. सुब्बरायुडुः**

प्राचार्यः, श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः

## सम्पादकीयम्

**नवपरिसरश्चायं संस्थानस्य मनोरमः।**
**प्रवाहयति राष्ट्रेऽस्मिन् संस्कृतजाह्नवीं नवाम्॥१॥**

**आयोजिताः विभागेषु सङ्गोष्ठ्यः शास्त्रसम्मताः।**
**द्वे चान्ताराष्ट्रिये तत्र शिष्टाश्च राष्ट्रियाः समाः॥२॥**

**व्याख्यानानि विशिष्टानि विद्वद्वरैः कृतानि वै।**
**देशस्य विविधभागात्समागतैर्विचक्षणैः॥३॥**

**वेद-वेदान्त-साहित्य-न्याय-व्याकरणादिषु।**
**व्याख्यानं ज्योतिषे शास्त्रे आधुनिकेऽभवत्पुनः॥४॥**

**विचित्रवर्णयुक्तानि षट्पुष्पाणि सुगन्धिनि।**
**विकसितान्यराजन्त वार्तावल्यभिधानि च॥५॥**

**सप्तमाष्टमपुष्पे च एकवृन्ते सुसंहते।**
**परिसरीयकीर्त्याख्यं सुसौरभं विकीरतः॥६॥**

**सन्त्यत्र विविधाः वार्ताः यथास्थानं प्रकाशिताः।**
**सङ्गोष्ठीवृत्तवैशिष्ट्याद्विशेषाङ्को विधीयते॥७॥**

**-सम्पादकौ**

## सुसम्पन्ना व्याकरणविभागीया अन्ताराष्ट्रिया सङ्गोष्ठी

बौद्धवैयाकरणानां संस्कृतव्याकरणपरम्परायां महद् योगदानं वर्तते। तच्च योगदानं रेखाङ्कयितुं तत्तन्महत्त्वं पुरस्कृत्य भारतशासनस्य मानवसंसाधनविकासमन्त्रालयान्तर्गतस्य राष्ट्रियसंस्कृतसंस्थानाङ्गभूततस्य देवप्रयागस्थ-श्रीरघुनाथकीर्तिपरिसरस्य व्याकरणविभागेन ०३.०२.२०१८ तः ०४.०२.२०१८ दिनाङ्कं यावत् एका द्विदिवसीया राष्ट्रिया सङ्गोष्ठी आयोजिता। अस्यां सङ्गोष्ठ्यां बौद्धवैयाकरणानां तत्तद्योगदानविषये अनुसन्धानात्मको विमर्शो सञ्जातः। एतेन विमर्शेन अवश्यमेव बौद्धसंस्कृत-वैयाकरणानां मौलिकव्याकरणग्रन्थानां, तत्तद्व्याख्याग्रन्थानां तथा तत्तदनुवादानाञ्च विषये नूतनाः दिशः समुद्भूताः अभूवन्।



उद्घाटनसत्रे भाषमाणः प्रो. डी.आर. पुरोहितः

एतस्याम् अन्ताराष्ट्रियसङ्गोष्ठ्यां बौद्धसंस्कृतव्याकरणपरम्पराविषये एतत्सम्बद्धान् अन्यानपि उपविषयान् चाधृत्य महान्तो विचाराः प्रवर्तिताः। तत्र ०३.०२.२०१८ दिनाङ्के चोद्घाटनसत्रे परिसरप्राचार्यस्य प्रो. के.बी. सुब्बरायुडुमहोदयस्य आध्यक्ष्ये श्रीनगरस्थ-हे.न. बहुगुणाविश्वविद्यालयस्य प्रो. डी.आर. पुरोहितमहोदयः मुख्यवक्तृरूपेण उद्बोधितवान्। वैदिक-लौकिकमङ्गलाचरणानन्तरं सङ्गोष्ठ्याः संयोजकः व्याकरणविभागाध्यक्षश्च प्रो. बनमाली बिश्वालः स्वागतभाषणं प्रास्ताविकञ्च प्रस्तुतवान्। अन्ते च डॉ. प्रफुल्लगड़पालः मञ्चस्थान् अतिथिवर्यान् अन्यांश्च धन्यवादान् वितरितवान्। कार्यक्रमस्य सञ्चालनं डॉ. मनीषजुगरानेन कृतम्। अस्मिन्नवसरे सङ्गोष्ठ्याः शोधपत्रसारांशिकाऽपि लोकाय समर्पिताऽभूत्।

संस्कृते व्याकरणशास्त्र-परम्परा अतीव प्राचीना महत्त्वपूर्णा च वर्तते। अस्यां परम्परायाम् पाणिनीयतन्त्रस्य अत्यधिकं महत्त्वं वर्तते। पाणिनीयतन्त्रे पुनः वार्तिककारस्य कात्यायनस्य तथा महाभाष्यकारस्य पञ्जजलेः च स्थानं गौरवास्पदम्। साक्षान्मुनिस्वरूपाणामेव तेषां त्रयाणामाचार्याणां त्रिमुनीति संज्ञा विश्वप्रसिद्धा। इतिहासः प्रमाणयति यत् पाणिनिः प्रथमो वैयाकरणो नासीत् नापि सः अन्तिमः। अतः संस्कृत-व्याकरणशास्त्रपरम्परा स्थूलरूपेण त्रिधा विभक्तुं शक्यते-१. पाणिनिपूर्वव्याकरणपरम्परा, २. पाणिनीयव्याकरणपरम्परा तथा ३. पाणिन्युत्तर-व्याकरणपरम्परा चेति। संस्कृत-व्याकरणशास्त्र-परम्परां समेधयत्सु एषु आचार्येषु बहवः यद्यपि सनातनपन्थिनो भवन्ति, किन्तु केचन हेमचन्द्र-कीर्तिचन्द्रसूरिसदृशाः जैनाचार्याः, इन्द्रगोमि-चन्द्रगोमि-सदृशाः बौद्धाचार्याः अपि भवन्त्येव। बौद्धकविभिः संस्कृते न केवलं विशिष्टानि काव्यानि रचितानि, किन्तु तैः बौद्धमनीषिभिः विविधशास्त्रेष्वपि स्वकीयं योगदानं सुनिश्चितम्। अत एव शास्त्र-परम्परायां विशिष्य व्याकरणशास्त्रपरम्परायां च तेषां भूमिका अनस्वीकार्या। तेषु बौद्धवैयाकरणेषु ऐन्द्रव्याकरणकारः इन्द्रगोमी, चान्द्रव्याकरणकर्ता चन्द्रगोमी, भाषावृत्तिकारः पुरुषोत्तमदेवः (देवः) अमरकोशप्रणेता अमरसिंहः, रूपावतारकारः धर्मकीर्तिः, काशिकाकारौ जयादित्य-वामनौ, न्यासकारः जिनेन्द्रबुद्धिः, वाक्यपदीयकारः भर्तृहरिः, क्रमदीश्वरः अनुभूतिस्वरूपाचार्यः तथा धर्मदासादयः उल्लेख्याः सन्ति। एवमेव कैश्चिद् बौद्धविद्वद्भिः संस्कृतव्याकरणग्रन्थानां तथा तद्वृत्तीनाम् अनुवादोऽपि तिब्बत्यादिभाषासु विहितः। अस्यां सङ्गोष्ठ्याां डा. शैलेशतिवारी, डॉ. रामचन्द्रः, डॉ. रवीन्द्रः, डॉ. ब्रजेन्द्रकुमारसिंहदेवः, डॉ. धर्मेन्द्रकुमारसिंहदेवः, डॉ. रामविनयसिंहस्तथाऽन्ये बहवो विद्वांसः शोधार्थिनश्च अत्र चत्वारिंशदधिकानि शोधपत्राणि प्रस्तुतवन्तः।



उद्घाटनसत्रे स्वागतभाषमाणं प्रास्ताविकं च प्रस्तुवन् प्रो. बनमालीबिश्वालः



सम्पूर्तिसत्रे जर्मनीदेशीयच्छात्रमभिनन्दन् मुख्यातिथिः कर्णप्रयाग-विधायकः श्रीभरतसिंहचौधुरी

०४.०२.२०१८ तमे दिनाङ्के सङ्गोष्ठ्याः समापनसत्रे जगन्नाथसंस्कृतविश्वविद्यालयस्य व्याकरणविभागाध्यक्षचरः प्रो. किशोरचन्द्रपाढी मुख्यवक्तृरूपेण समुद्बोधयन् व्याकरण-शास्त्रेषु बौद्धाचार्याणां योगदानं कीदृशमस्तीति सप्रमाणं प्रतिपादितवान्। अस्मिन् सत्रे प्रो. के.बी. सुब्बरायुडुमहोदयस्याध्यक्ष्ये कर्णप्रयागस्य विधायकः श्रीभरतसिंहचौधरीमहाभागः मुख्यातिथि-रूपेण उद्बोधितवान्। अन्ते च, धन्यवादज्ञापनं प्रो. बनमालीबिश्वालः अकरोत्। एवमेतस्मिन् विषये पञ्चाशदधिकाः विशेषज्ञाः विद्वांसः षट्सु सत्रेषु एतद्विषयकं विशिष्टं व्याख्यानं, विशिष्टानि शोधपत्राणि च प्रस्तूय सङ्गोष्ठीमिमां सफलीकृतवन्तः इति संसूच्य हर्षमनुभवामः।

## साहित्यविभागे अन्ताराष्ट्रिया सङ्गोष्ठी समायोजिता

फरवरीमासस्य चतुर्थे दिनाङ्के राष्ट्रियसंस्कृतसंस्थानस्य देवप्रयागस्थे श्रीरघुनाथकीर्तिपरिसरे साहित्यविभागीया द्विदिवसीया अन्ताराष्ट्रियसङ्गोष्ठी 'बौद्धमिश्रितसंस्कृतसाहित्यस्य वैश्विकः सन्देशः' इति विषये समायोजिता। उद्घाटनसत्रे देहलीविश्वविद्यालयस्य बौद्धाध्ययनविभागप्रमुखः प्रो. के.टी.एस. सराओ-महोदयः मुख्यातिथिरूपेण समुपस्थितः आसीत्। अयं महोदयः उद्घाटनसत्रेऽस्मिन् बौद्धमिश्रितसंस्कृतसाहित्यस्य महत्त्वं प्रत्यपादि। एवमेव कार्यक्रमेऽस्मिन् विशिष्टातिथिपदम् उत्कलदेशीयः जगन्नाथसंस्कृत-विश्वविद्यालयस्य भूतपूर्वः व्याकरणविभागाध्यक्षः प्रो. किशोरचन्द्रपाढी-महोदयः अलमकरोत्। प्रो. पाढीमहोदयः व्याकरणेषु बौद्धसंस्कृतभाषा-सम्बद्धान् विचारान् प्रास्तौत्। अस्य सत्रस्याध्यक्ष्यं परिसरप्राचार्यः प्रो. के.बी. सुब्बरायुडुमहोदयः निर्व्यूढवान्। सः च बौद्धसंस्कृतसाहित्यस्य वैश्विक-चिन्तनविषये स्वाशयं प्राकटयत्। ततश्च सङ्गोष्ठीसंयोजकः साहित्य-विभागाध्यक्षश्च डॉ. प्रफुल्लगडपाल-महोदयः सङ्गोष्ठ्याः प्रस्तावनां प्रास्तौत्। ततः पूर्वं कार्यक्रमेऽस्मिन् प्रो. बनमालीबिश्वालवर्योऽपि मञ्चे उपस्थाय स्वागतभाषणं प्रास्तौत्। सत्रस्यास्य संचालनं डॉ. मुकेशकुमारशर्मा अकरोत्। सत्रेऽस्मिन् डॉ. प्रफुल्लगडपालसम्पादितानां (अंगुत्तरनिकायस्य चतुर्णां भागानां) चतुर्णां ग्रन्थानां लोकार्पणं सञ्जातम्। अस्मिन् अवसरे सङ्गोष्ठ्याम् उपस्थापनीयानां शोधपत्रसाराणां संचयिनीभूता संगोष्ठी-'शोधपत्रसारावली' अपि लोकायार्पिता।



उद्घाटनसत्रे मुख्यवक्तृभाषणं प्रस्तुवन् प्रो. के.टी.एस. सराओ



उद्घाटनसत्रे स्वागतभाषमाणं प्रास्ताविकं च प्रस्तुवन् डा. प्रफुल्लगडपालः

अत्र च विशेषतः इदं ज्ञापनीयं वर्तते यद् बौद्धसंस्कृतसाहित्ये अनुसन्धान-अनुवाद-लेखनादिविकासाय परिसरे बौद्धसंस्कृतसाहित्यसंसाधनकेन्द्रस्य समुद्घाटनमपि अवसरेऽस्मिन् सञ्जातम्।

उद्घाटनसत्रानन्तरं साहित्यविभागीया विशिष्टव्याख्यानमाला अपि आयोजिता। 'बौद्धमिश्रितसंस्कृतसाहित्ये अनुवाद-अनुसन्धानयोः सम्भावनाः' इति विषयमधिकृत्य इदं साहित्यशास्त्रीयं विशिष्टं व्याख्यानं सम्पन्नम् । अत्र मुख्यवक्तृरूपेण प्रो. के.डी.एस. सराओ-महोदयः स्वाभिप्रायमप्रकटयत्।

अस्यां संगोष्ठ्यां पञ्चसत्रेषु भारतदेशस्य विभिन्नकोणेभ्य समागता शोधार्थिनः विद्वांसः च शोधपत्राणि प्रास्तुवन्। तत्र च प्रो. रामविनयसिंहः, डॉ. शैलेशतिवारी इत्यादयः धीमन्तः समुपस्थिताः अभूवन्। अस्यां प्रायशः पञ्चाशत् शोधपत्राणि प्रस्तुतानि अभूवन्। जर्मनदेशीयः क्रिस्टियन लॉफोर: (भक्तकृष्णः) अत्र आंग्लभाषया शोधपत्रं प्रस्तुवन् स्वाभिप्रायमप्रकटयत्।

फरवरीमासस्य पञ्चमे दिनाङ्के अस्याः अन्ताराष्ट्रिय-सङ्गोष्ठ्याः सम्पूर्तिसत्रम् आयोजितमभूत्। सम्पूर्तिसत्रेऽस्मिन् मुख्यातिथिरूपेण परिसरस्य व्याकरणविभागाध्यक्षः प्रो.बनमालीबिश्वालमहोदयः समुपस्थितः सन् उदबोधयत्तथा अध्यक्षत्वं च परिसरप्राचार्यः निर्व्योढि। कार्यक्रमस्य सञ्चालनं डॉ. मनीषजुगरानः अकरोत्।

अन्ते च राष्ट्रगानेन अस्याः अन्ताराष्ट्रिय-सङ्गोष्ठ्याः सम्पूर्तिः अभूत्। ध्यातव्यमस्ति यद् राष्ट्रियसंस्कृतसंस्थानं संस्कृतेन सह पालि-प्राकृतभाषयोः अध्ययनाय, अनुसन्धानाय संवर्धनाय च कृतसंकल्पं वर्तते। साम्प्रतं, संस्थानं पालि-प्राकृतभाषयोः साहित्यस्य संस्कृतच्छायया सह हिन्दी-आंग्लानुवादमपि कुर्वद् वर्तते।




प्रो. बिश्वालस्य आध्यक्ष्ये सम्पन्ने कस्मिंश्चित् शोधपत्रवाचनसत्रे शोधपत्रं प्रस्तुवन् लामा शान्ताकान्तनेगी

अस्मिन् क्रमे भावयामः यद् एतादृश्यः अन्ताराष्ट्रिया सङ्गोष्ठ्यः नूतनां कामपि विशिष्टां सम्भावनाम् उद्भावयिष्यन्तीति। अनेन च बौद्ध-मिश्रित-संस्कृत-साहित्यस्य अनुवाद-अनुसन्धान-विमर्शादिभिः नूनं भारतस्य गौरवः सर्वत्र प्रसरिष्यतीति विश्वसिमः।

## परिसरे समायोजिताः विविधविभागीयाः राष्ट्रिय-सङ्गोष्ठ्यः

राष्ट्रियसंस्कृतसंस्थानस्य श्रीरघुनाथकीर्तिपरिसरे फरवरीमासे प्रथमदिनाङ्कतो दशमदिनाङ्कं यावद् वेद-ज्योतिष-आधुनिकविषय-वेदान्त-न्यायशास्त्रीयाः राष्ट्रियसङ्गोष्ठ्यः समायोजिताः अभवन्। तासां सङ्गोष्ठीनां संक्षिप्तं विवरणमित्थं वर्तते–

**वेदविभागीया राष्ट्रिया सङ्गोष्ठी**–०१-०२.०२.२०१८ तमयोः दिनाङ्कयोः 'वेदस्मृत्योः धर्मादिविचारः' इति विषयमधिकृत्य वेदविभागीया राष्ट्रिया सङ्गोष्ठी सम्पन्ना। तत्र उद्घाटनसत्रे कुरुक्षेत्रविश्वविद्यालयस्य संस्कृतविभागाध्यक्षः प्रो. राजेश्वरमिश्र-महोदयः मुख्यवक्तृरूपेण, उत्तराखण्ड-राज्यस्य पूर्व-शिक्षामन्त्री श्रीमन्त्रिप्रसादनैथानिमहोदयश्च मुख्यातिथिरूपेण तथा परिसरप्राचार्यश्च प्रो. के.बी. सुब्बरायुडु-महोदयश्च अध्यक्षरूपेण उद्बोधितवान्। प्रो. बनमालीबिश्वालः स्वागतभाषणं प्रस्तुतवान्। डॉ. शैलेन्द्रप्रसाद-उनियालः प्रास्ताविकं प्रस्तुतवान् तथा डॉ. प्रफुल्लगडपालः चात्र धन्यवादज्ञापनं कृतवान्।

एवमेव समापनसत्रे अर्धनारीश्वरशिवमन्दिरस्य स्वामी पाण्डुरङ्गमहोदयः मुख्यातिथित्वेन परिसरप्राचार्यः प्रो. के.बी. सुब्बरायुडुश्च अध्यक्षरूपेण सभाम् उद्बोधितवन्तौ। डॉ. शैलेन्द्रप्रसादउनियालः सङ्गोष्ठीप्रतिवेदनं प्रस्तुतवान्। अस्यां सङ्गोष्ठ्यां चतुर्षु सत्रेषु विंशत्यधिकानि शोधपत्राणि प्रस्तुतानि अभूवन्।

**ज्योतिषविभागीया राष्ट्रिया सङ्गोष्ठी**–फरवरीमासस्य ४-५ दिनाङ्कयोः 'ज्योतिष-दर्शनयोः अन्तःसम्बन्धः' इति विषयमधिकृत्य ज्योतिषविभागीया राष्ट्रिया सङ्गोष्ठी सम्पन्ना। तत्र उद्घाटनसत्रे श्रीलालबहादुरशास्त्रि-राष्ट्रियसंस्कृतविद्यापीठस्य आचार्यः प्रो. प्रेमकुमार-शर्ममहोदयः मुख्यवक्तृरूपेण, परिसरप्राचार्यः प्रो. के.बी. सुब्बरायुडुमहोदयश्च अध्यक्षरूपेण उद्बोधितवन्तौ। प्रो. बनमालीबिश्वालः अत्र स्वागतभाषणं प्रस्तुतवान्। डा. सुरेशशर्मा प्रास्ताविकभाषणमकरोत्। डा. मुकेशकुमारश्च अत्र धन्यवादज्ञापनं कृतवान्।

एवमेव सङ्गोष्ठ्याः समापनसत्रे आचार्यः देवीप्रसादत्रिपाठिमहोदयः मुख्यातिथित्वेन, परिसरप्राचार्यः प्रो. के.बी. सुब्बरायुडुश्च अध्यक्षरूपेण सभाम् उद्बोधितवन्तौ। डॉ. मुकेशकुमारः अत्र सङ्गोष्ठीप्रतिवेदनं प्रस्तुतवान्। अस्यां सङ्गोष्ठ्यां पञ्च सत्रेषु विंशत्यधिकानि शोधपत्राणि प्रस्तुतानि अभूवन्।

**आधुनिकविभागीया राष्ट्रिया सङ्गोष्ठी**–फरवरीमासस्य ८-९ दिनाङ्कयोः 'भारतीय समाज का प्रतिबिम्बन : ऐतिहासिक और साहित्यिक सन्दर्भ में' इति विषये आधुनिक-विभागीया राष्ट्रिया सङ्गोष्ठी सम्पन्ना।

तत्र उद्घाटनसत्रे प्रो. दीनेशचन्दशकलानीमहोदयः मुख्यवक्तृरूपेण सभाम् उद्बोधितवान्। परिसरप्राचार्यः प्रो. के.बी. सुब्बरायुडुमहोदयश्च अत्र आध्यक्ष्यं निर्व्यूढवान्। प्रो. बनमालीबिश्वालः स्वागतभाषणं प्रस्तुतवान्। डा. अरविन्दगौडः प्रास्ताविकं भाषण-मकरोत्। डा. प्रफुल्लगडपालः चात्र धन्यवादज्ञापनं कृतवान्।

एवमेव सङ्गोष्ठ्याः समापनसत्रे प्रो. अभयसक्सेनामहोदयः मुख्यातिथित्वेन परिसरप्राचार्यः प्रो. के.बी. सुब्बरायुडुमहोदयश्च अध्यक्षरूपेण उद्बोधितवन्तौ। डॉ. अरविन्दगौडः अत्र सङ्गोष्ठीप्रतिवेदनं प्रस्तुतवान्। डा. वीरेन्द्रसिंहबर्त्वालश्च धन्यवादज्ञापनं कृतवान्। श्रीपङ्कजकुमारकोटियालः अस्मिन् सत्रे मञ्चसञ्चालनमकरोत्। अस्यां सङ्गोष्ठ्यां षट् सत्रेषु प्रायः पञ्चाशत् शोधपत्राणि प्रस्तुतानि अभूवन्।



वेदविभागीयसङ्गोष्ठ्यां मुख्यातिथिभाषणं कुर्वन् श्रीमन्त्रिप्रसादनैथानीमहोदयः



ज्योतिषविभागीयसङ्गोष्ठ्याः उद्घाटनसत्रस्य किञ्चन दृश्यम्




आधुनिकविभागीयसङ्गोष्ठ्याः उद्घाटनसत्रस्य किञ्चन दृश्यम्



आधुनिकविभागीयसङ्गोष्ठ्याः सम्पूर्तिसत्रे भाषमाणः प्रो. अभयसक्सेना




डा. के.एस. सतीशं सत्कुर्वन् प्राचार्यः प्रो. के.बी. सुब्बरायुडुः प्रो. बनमाली बिश्वालश्च

**वेदान्तविभागीया राष्ट्रिया सङ्गोष्ठी**–फरवरीमासस्य ९-१० दिनाङ्कयोः 'अद्वैततत्त्वज्ञानस्याधुनिकयुगे महत्त्वम्' इति विषये वेदान्तविभागीया राष्ट्रिया सङ्गोष्ठी सम्पन्ना । तत्र उद्घाटनसत्रे डा. के.एस. सतीशः मुख्यवक्तृरूपेण तथा परिसरप्राचार्यः प्रो. के.बी. सुब्बरायुडुमहोदयश्च अध्यक्षरूपेण उद्बोधितवन्तौ। अत्र डा. आर. बालमुरुगन् स्वागतभाषणं प्रास्ताविकं च प्रस्तुतवान्। प्रो. बनमालीबिश्वालश्च धन्यवादज्ञापनमकरोत्।

एवमेव १०.०२.२०१८ दिनाङ्के सङ्गोष्ठ्याः समापनसत्रे श्रीभास्करजोशि-महोदयः मुख्यातिथित्वेन, डा. भक्तवत्सलमहोदयः विशिष्टातिथिरूपेण तथा परिसर-प्राचार्यः प्रो. के.बी. सुब्बरायुडुश्च अध्यक्षरूपेण उद्बोधितवन्तः। सङ्गोष्ठीसंयोजकः अत्र सङ्गोष्ठीप्रतिवेदनं प्रस्तुतवान्। अस्यां सङ्गोष्ठ्यां चतुर्षु सत्रेषु प्रायः विंशत्यधिकानि शोधपत्राणि प्रस्तुतानि अभूवन्।



वेदान्तविभागीयसङ्गोष्ठ्यां सभामुद्बोधयन् श्रीभास्करजोशिमहोदयः

**न्यायविभागीया राष्ट्रिया सङ्गोष्ठी**–फरवरीमासस्य २७-२८ दिनाङ्कयोः 'न्यायशास्त्रे पदवृत्तिविचारः' इति विषये न्यायशास्त्रीया राष्ट्रिया सङ्गोष्ठी सम्पन्ना । तत्र उद्घाटनसत्रे कर्णाटकविश्वविद्यालयस्य आचार्यः प्रो. वीरनारायणपाण्डुरङ्गी मुख्यवक्तृरूपेण, परिसरप्राचार्यः प्रो. के.बी. सुब्बरायुडुमहोदयश्च अध्यक्षरूपेण सभाम् उद्बोधितवन्तौ। डा. आर. बालमुरुगः स्वागतभाषणं प्रास्ताविकभाषणं चाकरोत्। श्रीदेवेन्द्रशर्मा अत्र धन्यवादज्ञापनं कृतवान्। श्रीश्रीओमशर्मा चात्र मञ्चसञ्चालनं कृतवान्।

एवमेव सङ्गोष्ठ्याः समापनसत्रे उत्तराखण्ड-संस्कृत-विश्वविद्यालयस्य कुलपतिः प्रो. पीयूषकान्तदीक्षित-महोदयः मुख्यातिथित्वेन, परिसरप्राचार्याश्च अध्यक्षरूपेण उद्बोधितवन्तौ। डॉ. आर. बालमुरुगन् सङ्गोष्ठीप्रतिवेदनं प्रस्तुतवान् तथा धन्यवादांश्च ज्ञापितवान्। कार्यक्रमस्य सञ्चालनं डा. मनीषजुगरानेन कृतम्। अस्यां सङ्गोष्ठ्याम् प्रायः ५ सत्रेषु दशाधिकानि शोधपत्राणि च प्रस्तुतानि अभूवन्।



न्यायविभागीयसङ्गोष्ठ्यां धन्यवादज्ञापनं कुर्वन् श्रीदेवेन्द्रशर्मा

## ग्रन्थलोकार्पणकार्यक्रमः

श्रीरघुनाथकीर्तिपरिसरे 'बौद्धमिश्रितसंस्कृतसाहित्यस्य वैश्विकः सन्देशः' इति विषयिण्यां साहित्यविभागीयायाम् अन्ताराष्ट्रियसङ्गोष्ठ्याम् ०४.०२.२०१८ दिनाङ्के उद्घाटनसत्रे ग्रन्थ-लोकार्पणकार्यक्रमः सञ्जातः। तत्र डॉ. प्रफुल्लगडपालसम्पादितानां चतुर्णां ग्रन्थानां लोकार्पणं सम्पन्नम्। ते च ग्रन्थाः इमे सन्ति–१. अंगुत्तर-निकायो (पठमो भागो), २. अंगुत्तर-निकायो (दुतियो भागो), ३. अंगुत्तर-निकायो (ततियो भागो), ४. अंगुत्तर-निकायो (चतुत्थो भागो) च।



ग्रन्थलोकार्पणकार्यक्रमस्य किञ्चन दृश्यम्

अवसरेऽस्मिन् सङ्गोष्ठ्याम् उपस्थापनीय-शोधपत्रसाराणां सञ्चयिनीभूता सङ्गोष्ठ्याः 'शोधपत्रसारावली' अपि लोकायार्पिता। अयञ्च कार्यक्रमः प्रो. के.टी.एस. सराओ, प्रो. किशोरचन्द्रपाढी, प्रो. के.बी. सुब्बरायुडुः, प्रो. बनमालीबिश्वालः, डॉ. प्रफुल्लगडपालः, डॉ. मुकेशकुमारः चान्येषां च उपस्थितौ सम्पन्नः।



न्यायविभागीयसङ्गोष्ठ्याः सम्पूर्तिसत्रे प्रवर्तितस्य प्रमाणपत्रवितरणकार्यक्रमस्य किञ्चन दृश्यम्

## परिसरे समायोजितानि विविधशास्त्रीयविशिष्टव्याख्यानानि

राष्ट्रियसंस्कृतसंस्थानस्य श्रीरघुनाथकीर्तिपरिसरे फरवरीमासे वेद-व्याकरण-साहित्य-ज्योतिष-आधुनिक-वेदान्त-शास्त्रीय-विशिष्टव्याख्यानानि समायोजितानि। विविधविश्वविद्यालयेभ्यः प्रतिष्ठिताः विद्वांसः समुपस्थाय तत्तद्विभागेषु स्व-स्वशास्त्रविषयकानि विशिष्टव्याख्यानानि प्रस्तुतवन्तः। परिसरे आयोजितानां समस्तानां तत्तच्छास्त्रीयाणां विशिष्टव्याख्यानानां विवरणम् इत्थं वर्तते–

**१. वेद-विभागीयं विशिष्टव्याख्यानम्–**०१.०२.२०१८ तमे दिनाङ्के 'वैदिक-स्वराः तेषां प्रयोजनानि च' इति विषयमधिकृत्य वेदविभागीयं विशिष्टव्याख्यानं सम्पन्नम्। अत्र परिसरप्राचार्यस्य प्रो. के.बी. सुब्बरायुडुमहोदयस्य आध्यक्ष्ये प्रवर्तितेऽस्मिन् विशिष्टव्याख्याने कुरुक्षेत्रविश्वविद्यालयस्य संस्कृतविभागाध्यक्षः प्रो. राजेश्वरमिश्रमहोदयः विशिष्टं व्याख्यानं प्रादात्।



वेदविभागीयं विशिष्टव्याख्यानं प्रस्तुवन् प्रो. राजेश्वरमिश्रः

अत्र स्वागतभाषणं प्रो. बनमालीबिश्वालः प्रस्तुतवान्। वेदविभागस्य प्राध्यापकः डॉ. शैलेन्द्रप्रसादउनियालः विषयप्रवर्तनं धन्यवादज्ञापनं च अकरोत्।

**व्याकरण-विभागीयं विशिष्टव्याख्यानम्–**फरवरीमासस्य द्वितीयदिनाङ्के 'शब्दविद्यायां बौद्धाचार्याणां योगदानम्' इति विषये व्याकरणशास्त्रीयं विशिष्टं व्याख्यानं समायोजितम् । श्रीजगन्नाथसंस्कृतविश्वविद्यालयस्य पूर्वतनव्याकरण-विभागाध्यक्षेन प्रो. किशोरचन्द्रपाढीमहोदयेन अत्र अत्यन्तं शोधपरकं व्याख्यानं प्रस्तुतम्। अत्र स्वागतं विषयप्रवर्तनं च कृतवान् व्याकरणविभागाध्यक्षः प्रो. बनमाली बिश्वालः। प्रो. के.बी. सुब्बरायुडुमहोदयस्याध्यक्ष्ये सम्पन्नेऽस्मिन् व्याख्यानकार्यक्रमे डा. प्रफुल्लगडपालः धन्यवादान् ज्ञापितवान्। सञ्चालनञ्च डा. मुकेशकुमारः अकरोत्।



व्याकरणविभागीयं विशिष्टव्याख्यानं प्रस्तुवन् प्रो. किशोरचन्द्रपाढी

स्वीये विशिष्टव्याख्याने प्रो. किशोरचन्द्रपाढीमहोदयः अकथयत् यद् 'बौद्धवैयाकरणाः भिन्न-भिन्न-कालखण्डेषु स्व-स्व-कृतिततिभिः संस्कृत-व्याकरण-शास्त्र-परम्परां पोषितवन्तः। एषु आचार्येषु अधिसंख्याकाः यद्यपि पाणिन्युत्तरवर्तिनः सन्ति, तथापि नैके पाणिनिपूर्ववर्तिनः अपि भवितुमर्हन्ति। एतैश्च बौद्धवैयाकरणैः यत्रैकतः ऐन्द्र-चान्द्र-सामन्तभद्र-विश्रान्तिविद्याधर-बालावबोध-अष्टधातु-मञ्जुश्रीशब्दलक्षणादीनि स्वतन्त्र-व्याकरणानि प्रणीतानि तत्रैवापरतः नैके बौद्धाचार्याः प्रसिद्धव्याकरणानां व्याख्याग्रन्थानपि लिखितवन्तः। बौद्धव्याख्याकारैः प्रणीतासु व्याख्यासु काशिका-रूपावतार-न्यास-भागवृत्ति-दुर्घटवृत्ति-चान्द्रवृत्ति-वाक्यपदीयप्रकीर्णव्याख्या-तन्त्रप्रदीप-चान्द्रपञ्जिका-अनुन्यास-कातन्त्रव्याकरण-टीका-लिङ्गानुशासन-भाषावृत्ति-पात्रीकरण-लीनार्थदीप-चान्द्रपद्धति-बोधिन्यास-सुबन्तरत्नाकर-भाषावृत्तिविवरणपञ्जिका-सुबोधिनीगणटिप्पणिका-आख्यात-विचार-उपयोगक्रमसदृश्यो नैकाः व्याख्याः प्रमुखाः सन्ति इति।'

**साहित्य-विभागीयं विशिष्टव्याख्यानम्–**०४.०२२.२०१८ तमे दिनाङ्के 'बौद्ध-मिश्रितसंस्कृतसाहित्ये अनुवाद-अनुसन्धानयोः सम्भावना:' इति विषयमधिकृत्य साहित्यशास्त्रीयं विशिष्टं व्याख्यानं सम्पन्नम् । परिसरप्राचार्यस्य प्रो. के.बी.सुब्बरायुडु-महोदयस्य आध्यक्ष्ये सम्पन्नेऽस्मिन् विशिष्टव्याख्यानकार्यक्रमे मुख्यवक्तृरूपेण दिल्लीविश्वविद्यालयस्य बौद्धाध्ययनविभागाध्यक्षः प्रो. के.टी.एस. सराओमहोदयः समुपस्थितः। मञ्चे समुपस्थितः प्रो. बनमाली बिश्वालः स्वागतभाषणमकरोत्। साहित्यविभागाध्यक्षः डॉ. प्रफुल्लगडपालः विषयप्रवर्तनम् अकरोत्। अत्र च विशिष्टातिथित्वेन समुपस्थाय प्रो. किशोरचन्द्रपाढी सभामुद्बोधितवान्।


साहित्यविभागीयविशिष्टव्याख्यानमालायां भाषमाणः प्रो. के.टी.एस. सराओ

अत्र मुख्यवक्तृरूपेण प्रो. के.टी.एस. सराओ-महोदयः स्वाभिप्रायमप्रकटयत् यत् 'साम्प्रतं मानवः विविधकार्येषु लग्नो दृश्यते। एतस्मात् परिवारस्य भावः सर्वथा विलुप्तः एव प्रतिभाति। शान्तेः अहिंसायाश्च कुत्रापि दर्शनं न जायते। मानवो मानवस्यापि शत्रुः प्रतिभाति, यदि बौद्धमिश्रितसंस्कृतसाहित्यस्य अध्ययनं क्रियते चेद् वस्तुतः प्रत्येकं जनः मानवताम् अवगमिष्यति तत्पालनं च करिष्यति। बौद्धमिश्रित-संस्कृतसाहित्ये अनुवादानुसन्धानयोः विपुलाः सम्भावनाः सन्ति। यदि अस्मिन् क्षेत्रे कार्यं क्रियते तर्हि तत्र बह्व्यः सम्भावनाः लक्ष्यन्ते' इति। एतादृशाः अमृततुल्यविचाराः सर्वेभ्यः प्रेरणास्पदाः अभूवन्।



ज्यौतिषविभागीयविशिष्टव्याख्यानमालावसरे प्रबोधयन् प्राचार्यः प्रो. के.बी. सुब्बरायुडुः

अस्मिन् सारस्वतसत्रे डॉ. प्रफुल्लगडपालः धन्यवादान् दत्तवान्। डॉ. मनीष-जुगरानः चात्र मञ्चसञ्चालनमकरोत्।

**ज्योतिष-विभागीयं विशिष्टव्याख्यानम्**–०६.०२.२०१८ तमे दिनाङ्के 'ज्योतिष-दर्शनयोः सम्मतः ब्रह्मस्वरूपविचारः' इति विषयमधिकृत्य ज्योतिषशास्त्रीयं विशिष्टं व्याख्यानं सम्पन्नम्।

अत्र परिसरप्राचार्यस्य प्रो. के.बी. सुब्बरायुडुमहोदयस्य आध्यक्ष्ये प्रवर्तितेऽस्मिन् विशिष्टव्याख्याने देवीप्रसादत्रिपाठिमहोदयः विशिष्टं व्याख्यानं प्रादात्। स्वागतभाषणं प्रो. बनमालीबिश्वालः, विषयप्रवर्तनं डा. मुकेशकुमारः, धन्यवादज्ञापनं डा. सुरेश-कुमारः तथा मञ्चसञ्चालनं च डा. मनीषजुगरानः अकरोत्।




आधुनिकविभागीयविशिष्टव्याख्यानमालायाः किञ्चन दृश्यम्

**आधुनिक-विभागीयं विशिष्टव्याख्यानम्**–०७.०२.२०१८ तमे दिनाङ्के 'हिन्दी-साहित्य में अन्तर्निहित ऐतिहासिक एवं सांस्कृतिक तत्त्व' इति विषये आधुनिकविभागीयं विशिष्टव्याख्यानं सम्पन्नम्।

अत्र परिसरप्राचार्यस्य प्रो. के.बी. सुब्बरायुडुमहोदयस्य आध्यक्ष्ये प्रवर्तितेऽस्मिन् विशिष्टव्याख्याने प्रो. एन.पी. सिंहमहोदयः विशिष्टं व्याख्यानं प्रादात्। स्वागतभाषणं प्रो. बनमालीबिश्वालः, विषयप्रवर्तनं डा. अरविन्दगौडः, मञ्चसञ्चालनं डा. मुकेशकुमारः तथा धन्यवादज्ञापनं डा. वीरेन्द्रबर्त्वालः अकरोत्



वेदान्तविभागीयविशिष्टव्याख्यानमालायां भाषमाणः डा. के.एस. सतीशः

**वेदान्त-विभागीयं विशिष्टव्याख्यानम्**–०९.०२.२०१८ तमे दिनाङ्के 'वेदान्तदृष्ट्या वस्त्ववस्तुरूपविमर्शः' इति विषये वेदान्तविभागीयं विशिष्टं व्याख्यानं सम्पन्नम्।

परिसरप्राचार्यस्य प्रो. के.बी. सुब्बरायुडुमहोदयस्य आध्यक्ष्ये प्रवर्तितेऽस्मिन् विशिष्टव्याख्याने डा. के.एस. सतीशमहोदयः विशिष्टं व्याख्यानं प्रादात्। विषयप्रवर्तनं डा. आर. बालमुरुगः तथा धन्यवादज्ञापनं च प्रो. बनमालीबिश्वालः कृतवान्।

**न्याय-विभागीयं विशिष्टव्याख्यानम्**–२७.०२.२०१८ तमे दिनाङ्के 'न्यायशास्त्रे पदवृत्तिविचारः' इति विषये न्यायशास्त्रीयं विशिष्टं व्याख्यानं सम्पन्नम्।

परिसरप्राचार्यस्य प्रो. के.बी. सुब्बरायुडुमहोदयस्य आध्यक्ष्ये प्रवर्तितेऽस्मिन् विशिष्टव्याख्याने प्रो. वीरनारायणपाण्डुरङ्गीमहोदयः विशिष्टं व्याख्यानं प्रादात्। स्वागतभाषणं विषयप्रवर्तनं च डा. आर. बालमुरुगः, धन्यवादज्ञापनं श्रीहरीशडङ्गवालः तथा मञ्चसञ्चालनं च श्रीश्रीओमशर्मा अकरोत्।



न्यायविभागीयविशिष्टव्याख्यानमालायाः किञ्चन दृश्यम्

# परिसरीयविशिष्टकार्यक्रमाः

**वसन्तपञ्चमी**–२२.०१.२०१८ तमे दिनाङ्के देवप्रयागस्थे श्रीरघुनाथकीर्तिपरिसरे बसन्त-पञ्चमीमहोत्सवः समाचरितः। अस्मिन् महोत्सवे परिसरप्राचार्येण 'प्रो.के.बी.सुब्बरायुडुमहोदयेन सरस्वतीदेव्याः समर्चनं विहितम्। कार्यक्रमेऽस्मिन् वेदविभागस्य प्राध्यापकेन डॉ. शैलेन्द्रप्रसाद-उनियालेन पञ्चाङ्गपीठस्य निर्माणं कृत्वा वेदविहितविधिना कुशलाचार्यकर्मणा पराम्बायाः विद्यादेव्याः सरस्वत्याः षोडशोपचारेण पूजनं कारितम्।

अस्मिन्नवसरे परिसरस्य सर्वे प्राध्यापकाः छात्राश्च सरस्वतीं देवीमार्चन्।



वसन्तपञ्चम्यायोजनस्य किञ्चन दृश्यम्



गणतन्त्रदिवसावसरे ध्वजारोहणस्य किञ्चन दृश्यम्

**गणतन्त्रदिवसोत्सवः**–२६.०१.२०१८ तमे दिनाङ्के प्रातः ०९:०० वादने परिसरस्य क्रीडाङ्गणे अष्टषष्टितमं गणतन्त्रदिवसमुपलक्ष्य प्रो. के.बी. सुब्बरायुडुमहोदयेन पर्वतशृंखलानां मध्ये हरितप्राङ्गणे ध्वजारोहणं विधाय सभां सम्बोधयता उक्तं यद् 'सर्वेऽपि नागरिकाः संविधानस्य पालनं कुर्युः तथा स्व-स्वाधिकारान् च जानीयुः। वस्तुतः अस्माकं पूर्वजानां संविधानस्य निर्माणे महद्योगदानमस्ति।'

ततः परिसरच्छात्रैः गणतन्त्रदिवसमुपलक्ष्य काव्यपाठसहितानि देशभक्तिगीतानि भाषणानि च कृतानि। एवमेव परिसरप्राध्यापकैः छात्राणां कृते ज्ञानवर्धकानि सन्मार्गप्रेरकाण्नि भाषणानि च प्रदत्तानि। एतदवसरे प्रभाषता प्रो. बनमालीबिश्वालेन भाषणान्ते स्वरचितमेकं राष्ट्रभक्तिपरकं संस्कृतकाव्यं प्रस्तुतम्।



विश्वमातृभाषादिवसावसरे मुख्यातिथिं सत्कुर्वन्तः परिसरीयाध्यापकाः

**विश्वमातृभाषादिवसः**–प्रतिवर्षं विश्वस्मिन्नपि विश्वे २१.०२.२०१८ तमे दिनाङ्के विश्वमातृभाषा-दिवसः समायोंज्यते। अवसरेऽस्मिन् परिसरेऽपि मातृभाषादिवसः समायोजितः। अस्मिन्नवसरे देवप्रयागस्थस्य ओंकारानन्दमहाविद्यालयस्य हिन्दीविभागाध्यक्षः डॉ. अनिलकुमारनैथानी विशिष्टातिथिरूपेण उदबोधयत्। नैथानीमहोदयेन गढवालीभाषया काव्यपाठोऽपि कृतः।

अवसरेऽस्मिन् साहित्यविभागाध्यक्षेण डॉ. प्रफुल्लगडपालमहोदयेन उक्तं यत् 'छात्राणां कृते नैकभाषाणां ज्ञानमावश्यकं भवति तथा मातृभाषायाः प्रयोगस्तु सर्वदा कर्त्तव्य एव। वस्तुतस्तु मातृभाषादिवसस्य आरम्भः बाँग्लादेशे आन्दोलनकारणात् अभवत्। एवमन्ते अन्यैरपि प्राध्यापकैः मातृभाषायाः प्रयोगविषये स्वे-स्वे विचाराः प्रकटिताः।



युवमहोत्सवस्य किञ्चन दृश्यम्

**अन्तःपरिसरीयः युवमहोत्सवः**–०४.०३.२०१८ तमे दिनाङ्के परिसरस्य छात्राः दशमे अन्तःपरिसरीये युवमहोत्सवे भागग्रहणाय मुम्बईनगर्यां विद्यमानं के.जी. सोमैय्यापरिसरं गतवन्तः। तत्र युवमहोत्सवस्यायोजनं ०८.०३.२०१८ दिनाङ्कतः ११.०३.२०१८ दिनाङ्क-पर्यन्तमासीत्। परिसरछात्रैः तत्र बहु उत्तमतया प्रदर्शनं कृतम्।

तत्र शास्त्रिद्वितीयवर्षस्य छात्रेण मनीषपन्तेन रजतपदकं तथा आचार्यप्रथमवर्षस्य छात्रेण नीरजेन च कांस्यपदकं प्राप्तमिति परिसरस्य कृते गौरवास्पदं तथ्यं वर्त्तते।




संस्कृतचलचित्रनिर्माणकार्यशालायाम् उद्बोधयन् अखिलेशगुप्तः परिसरीयप्राध्यापकाश्च

**संस्कृतचलचित्रनिर्माणकार्यशाला**–ऐषमः युवमहोत्सवे राष्ट्रियसंस्कृतसंस्थानेन ऐदम्प्राथम्येन लघुसंस्कृतचलचित्रनिर्माणस्पर्धा आयोजिता। एतन्निमित्तं परिसरीय-च्छात्राणाम् अध्यापकानां कृते काचित् संस्कृतचलचित्रनिर्माणकार्यशाला २३-२५ फरवरी, २०१८ इत्यस्मिन् अवधौ डा. प्रफुल्लगडपालस्य संयोजकत्वेन समायोजिताऽभवत्। अस्यां चलचित्रनिर्माणकार्यशालायाम् आधारपुरुषत्वेन समागतेन श्री अखिलेशगुप्तेन प्रतिभागिभ्यः एतद्विषयकं प्रशिक्षणं प्रदत्तम्।

## अखिलभारतीयसंस्कृतकविसम्मेलनं समायोजितम्




अखिलभारतीयसंस्कृतकविसम्मेलने अतिथीन् सम्मानयन्तौ प्रो. बनमालीबिश्वालः डा. प्रफुल्लगडपालश्च

०४.०२.२०१८ तमे दिनाङ्के परिसरे आधुनिक-संस्कृतसाहित्य-संसाधनकेन्द्र-साहित्य-विभागयोः संयुक्तप्रयासेन अखिलभारतीयं संस्कृतकविसम्मेलनं महतोल्लासेन सम्पन्नम्। व्याकरणविभागाध्यक्षस्य प्रो. बनमालीबिश्वालस्याध्यक्ष्ये सम्पन्नेऽस्मिन् अखिल-भारतीयसंस्कृतकविसम्मेलने देशस्य नैके प्रतिष्ठिता सुरसिकाश्च संस्कृतकवयः स्वरचितकाव्यपाठं कृतवन्तः। अस्मिन् सम्मेलने कविभिः प्रस्तुतासु कवितासु वसन्तस्य प्रभावः परिलक्षितः। प्रायः सर्वैः कविभिः शृङ्गारपरक-रचनाभिः श्रोतृन् मन्त्रमुग्धान् कृतवन्तः। ये च कवयः काव्यपाठं कृतवन्तः तेषु प्रमुखाः आसन्-प्रो. बनमालीबिश्वालः, डा. रामविनय-सिंहः, डा. शैलेशतिवारी, डा. ब्रजेन्द्रसिंहदेवः, डा. धर्मेन्द्रसिंहदेवः, डा. रवीन्द्रः, डा. आशुतोष-गुप्ता, श्रीपङ्कजः, डा. मनीषजुगरानश्च। कविगोष्ठ्यन्ते प्रो. बिश्वालेन अध्यक्षीयमुद्बोधनं प्रदत्तं तथा मुकेशकुमारेण च कविसङ्गोष्ठ्याः सुचारु सञ्चालनं विहितम्। तत्र चादौ बाह्याः कवयः आधुनिकसंस्कृतसाहित्यसंसाधनकेन्द्रस्य समन्वयकेन प्रो. बनमालीबिश्वालेन तथा साहित्यविभागाध्यक्षेन डा. प्रफुल्लगडपालेन अङ्गवस्त्रैः पुष्पगुच्छैश्च सम्मानिताः।



अखिलभारतीयसंस्कृतकविसम्मेलने अध्यक्षीयभाषणं कुर्वन् प्रो. बनमालीबिश्वालः

## समुद्घाटितं बौद्धसंस्कृतसाहित्यसंसाधनकेन्द्रम्

श्रीरघुनाथकीर्तिपरिसरे ०४-०५ फरवरी, २०१८ दिनाङ्कयोः 'बौद्धमिश्रितसंस्कृतसाहित्यस्य वैश्विकः सन्देशः' इति विषये समायोजितायाः साहित्यविभागीयायाः द्विदिवसीयायाः अन्ताराष्ट्रियसङ्गोष्ठ्याः उद्घाटनावसरे 'बौद्धसंस्कृतसाहित्यसंसाधनकेन्द्रस्य समुद्घाटनं सञ्जातम्। अवसरेऽस्मिन् मुख्यातिथिरूपेण दिल्लीविश्वविद्यालयस्य बौद्धाध्ययनविभागप्रमुखः प्रो. के.टी.एस. सराओ-महोदयः, विशिष्टातिथित्वेन प्रो. किशोरचन्द्रपाढी-महोदयः, सत्राध्यक्षत्वेन परिसरप्राचार्यः प्रो. के.बी. सुब्बरायुडुमहोदयः, सङ्गोष्ठीसंयोजकः, संसाधनकेन्द्रसमन्वयकः साहित्यविभागाध्यक्षश्च डॉ. प्रफुल्लगडपालः, व्याकरणविभागाध्यक्षः प्रो. बनमालीबिश्वालः तथा अन्ये अतिथयः, प्राध्यापकाः छात्राश्च समुपस्थिताः आसन्।

वस्तुतः देशे न कस्मिंश्चित् विश्वविद्यालये संस्थाने वा एतादृशं केन्द्रं वर्तते, यत्र बौद्धसंस्कृतसाहित्यविषये एकत्र एव सर्वाणि संसाधनानि समुपलब्धानि स्युः। तादृश्याम् अस्याम् अवस्थायाम् इदं केन्द्रं नूनं बौद्धसंस्कृतसाहित्यविषयकेषु अनुसन्धान-प्रकाशनादि-कार्येषु किमपि विशिष्टं योगदानं करिष्यति।




बौद्धसंस्कृतसाहित्यसंसाधनकेन्द्रस्य उद्घाटनस्य किञ्चन दृश्यम्

## राष्ट्रियसेवायोजनाशिबिरम्

२०-२६.०३.२०१८ इत्यवधौ परिसरस्य छात्रैः राष्ट्रीयसेवायोजनाशिबिरे (N.S.S.) भागग्रहणं कृतम्। अस्य च शिबिरस्य आयोजनं देवप्रयागस्य निकटे 'सौंड'ग्रामेऽभवत्, यस्य संयोजनं डॉ. सुरेशशर्मणा विहितम्। अस्मिन् राष्ट्रियसेवायोजनाशिबिरे प्रायः २५ छात्रैः भागो गृहीतः। यैः तत्रत्यपर्यावरणानुरूपाणि यथोचितानि कार्याणि विहितानि।

तद्यथा-तैः प्रथमे दिवसे नागरिकाणां समस्याः परिगण्य विचार-विमर्शो विहितः। द्वितीये दिवसे स्वयंसेविभिः जलस्रोतसः स्वच्छीकरणं विहितम्। एवमेव तृतीयेऽहनि तैः सम्मिल्य तृणानि समुत्थाप्य तानि वह्नौ प्रज्वालितानि। चतुर्थे दिवसे 'व्यक्तित्वविकासविषये' डॉ. शैलेन्द्रोनियालवर्येण छात्राः प्रत्यायिताः। पञ्चमे दिवसे प्रो. बनमालीबिश्वालेन प्रतिभागिनः सम्बोधिताः। ततश्च प्रज्वलितं वह्निं प्रशमयितुं छात्रैः प्रयासः कृतः। षष्ठे दिवसे ग्रामीणानां गृहेषु गत्वा तैः तत्रापि स्वच्छता कृता। सप्तमे दिवसे समापनसत्रे परिसरस्य व्याकरणविभागाध्यक्षस्य प्रो. बनमालीबिश्वालस्य आध्यक्ष्ये डॉ.वीरेन्द्रबर्त्वाल-डॉ.शैलेन्द्रउनियाल-श्रीश्रीओमशर्मा चेत्यादिभिः प्राध्यापकैः भाषणानि प्रदत्तानि। अस्मिन्नवसरे ग्रामणी-श्रीमति राखीदेवी अपि सभां सम्बोधितवती।




राष्ट्रियसेवायोजनाशिबिरस्य किञ्चन दृश्यम्

## प्राचार्यदैनन्दिनी

| | |
|---|---|
| १५.०१.१८ | राष्ट्रियसंस्कृतसंस्थाने मुख्यालये कार्यालयीयपरिचर्चायां भागग्रहणं। |
| ०१-१०.०२.१८ | राष्ट्रियसंस्कृतसंस्थानाङ्गभूतस्य श्रीरघुनाथकीर्तिपरिसरस्य विविधगोष्ठीषु आध्यक्षं निर्व्यूढम्। |
| १५-२०.०२.१८ | तैलङ्गानास्थिते वासरक्षेत्रे वैदिकसम्मेलने मुख्यातिथिरूपेण भागग्रहणम्। |
| २७-२८.०२.१८ | न्यायविभागीयसङ्गोष्ठ्या आध्यक्षं निर्व्यूढम्। |
| ०७-१०.०३.१८ | मुम्बईस्थिते राष्ट्रियसंस्कृतसंस्थानस्य के.जी. सोमैय्या-परिसरे युवमहोत्सवे मार्गदर्शकत्वेन भागग्रहणम्। |
| ११.०३.१८ | उत्तराखण्डसंस्कृतविश्वविद्यालये विद्वत्परिषदि विषयविशेषज्ञत्वेन भागग्रहणम्। |
| १२.०३.१८ | उत्तराखण्डसंस्कृतविश्वविद्यालये दीक्षान्तसमारोहे भागग्रहणं विद्वत्परिषत्सदस्यरूपेण च उपस्थितिः। |
| १७.०३.१८ | उज्जयिनीस्थे पुस्तकलोकार्पणकार्यक्रमे समुपस्थितिः। |
| २७-२८.०३.१८ | राष्ट्रियसंस्कृतसंस्थाने श्रीरणवीरपरिसरे दर्शनविभागस्य सङ्गोष्ठ्यां मुख्यातिथिरूपेण उद्बोधनम्। |
| २८.०३.१८ | राष्ट्रियसंस्कृतसंस्थाने सहायकाचार्य-सहाचार्य-आचार्य-प्रोन्नति-उपवेशने भागग्रहणम्। |
| ०६.०४.१८ | हनुमज्जयन्तीसङ्गोष्ठ्यामुपद्बोधनम्। |
| २३.०४.१८ | तिरुपतौ राष्ट्रियसङ्गोष्ठ्यामुपद्बोधनम्। |
| २८.०३.१८ | नवदेहल्यां राष्ट्रियसंस्कृतसंस्थाने विद्यापरिषदि भागग्रहणम्। |



## परिसरीय-विदुषां शैक्षिकाः उपलब्धयः गतिविधयश्च

**प्रो. बनमाली बिश्वालः–**

- ०२-०३.०२.२०१८ दिनाङ्कयोः 'संस्कृतव्याकरणपरम्परायां बौद्धवैयाकरणानां योगदान'मिति विषयमधिकृत्य समायोजितायां व्याकरणविभागीयद्विदिवसीयायाम् अन्ताराष्ट्रिय-सङ्गोष्ठ्यां विषयप्रवर्तनं कृतवान्, एकस्मिन् सत्रे सत्राध्यक्षत्वं निर्व्यूढवान् तथा 'संस्कृतव्याकरणपरम्परायां रूपावतारस्य योगदान'मिति इति विषयमधिकृत्य शोधपत्रं च प्रस्तुतवान्।
- ०४-०५.०२.२०१८ दिनाङ्कयोः 'बौद्धमिश्रितसंस्कृतसाहित्यस्य वैश्विकसन्देशः' इति विषयमधिकृत्य प्रवर्तितायां साहित्यविभागीय-अन्ताराष्ट्रिय- सङ्गोष्ठ्यां स्वागतभाषणं कृतवान्, एकस्मिन् सत्रे सत्राध्यक्षत्वं निर्व्यूढवान् तथा 'Buddhist charyas as reflected in Atish Dipankara's Charyasangrahapradipa' इति विषमाधृत्य शोधपत्रं प्रस्तुतवान्।
- ०४.०२.१८ दिनाङ्के देवप्रयागस्थे श्रीरघुनाथकीर्तिपरिसरे 'अखिलभारतीयसंस्कृतकविसमवाये' संस्कृत-काव्यपाठं प्रस्तुतवान्।
- ८-९.२.२०१८ दिनाङ्कयोः समायोजितायाम् आधुनिकविषयक-राष्ट्रियसंगोष्ठ्यां एकस्मिन् सत्रे सत्राध्यक्षत्वं निर्व्यूढवान् तथा 'भारतीय नारी : अतीत से वर्तमान तक (संस्कृत-वाङ्मय के विशेष सन्दर्भ में)' इति विषयमधिकृत्य शोधपत्रं प्रस्तुतवान्। एवमन्यविभागीय-राष्ट्रिय-सङ्गोष्ठीष्वपि अनेकविधं दायित्वं सम्पादितवान्।
- १५.०२.२०१८ तः १७.०२.२०१८ दिनाङ्कं यावत् पुणे-विश्वविद्यालयस्य प्रगत-संस्कृताध्ययन-केन्द्रे समायोजितायां 'संस्कृतभाषायाः अन्यभाषा-साहित्योपरि प्रभावः' (The Influence of Sanskrit on other Indian Languages and literature) इति विषयक-त्रिदिवसीये राष्ट्रिय-सम्मेलने सत्राध्यक्षं निरवहत् तथा विशिष्टे चर्चासत्रे (Plenary Session) 'मध्य-पहाड़ी क्षेत्र की गढवाली उपभाषा और उस पर संस्कृत का प्रभाव' इति विषयमधिकृत्य विशिष्ट-व्याख्यानं प्रदत्तवान्।
- १५-१७.०३.२०१८ दिनाङ्केषु पुणे-विश्वविद्यालयस्य प्रगत-संस्कृताध्ययन-केन्द्रे समायोजितायां 'योगः – सिद्धान्तः प्रयोगश्च (Yoga : Theory and Practice) इति विषयमधिकृत्य शोधपत्रं प्रस्तुतवान्।
- १९-२३.०२.२०१८ दिनाङ्केषु पुणे-विश्वविद्यालयस्य प्रगत-संस्कृताध्ययन-केन्द्रे समायोजितायां व्याख्यानमालायां विशिष्टव्याख्यानानि प्रदत्तवान्।

- ३०.०३.२०१८ तमे दिनाङ्के हरिद्वारस्थ-आदर्शसंस्कृतमहाविद्यालये 'संस्कृतवाङ्मये मानवमूल्यानि' इति विषयमधिकृत्य समायोजितायाम् एकदिवसीय-राष्ट्रिय-संगोष्ठ्यां सत्राध्यक्षरूपेण उपस्थाय 'आधुनिकसंस्कृतकथासु मानवमूल्यानि' इति विषयमधिकृत्य शोधपत्रं प्रस्तुतवान्। तत्र च अखिलभारतीय-संस्कृतकविसमवाये संस्कृत-काव्यपाठं कृतवान्।
- अस्मिन्नवधौ कथासरित्पत्रिका-पद्यबन्धा-सदृशीनां नैकासां पत्र-पत्रिकाणां सम्पादनं कृतवान्। केषाञ्चिद् दिल्लीविश्वविद्यालय-गोरखपुरविश्वविद्यालयादीनां शोधप्रबन्धानां बाह्यपरीक्षकदायित्वं सम्पादितवान्। नैके शोधलेखाः कविताः कथाश्च विविध-राष्ट्रियान्ताराष्ट्रिय-शोध-साहित्यिक-पत्रिकासु प्रकाशिताः। एतवमेवास्मिन्नवधौ प्रयागस्थ-गङ्गानाथझापरिसरस्य एकः शोधच्छात्रः शोधप्रबन्धं प्रस्तुतवान्।

**डॉ. प्रफुल्लगडपालः-**

- ०२-०३.०२.२०१८ दिनाङ्कयोः 'संस्कृतव्याकरणपरम्परायां बौद्धवैयाकरणानां योगदान'मिति विषयमधिकृत्य समायोजितायां व्याकरणविभागीयद्विदिवसीयायाम् अन्ताराष्ट्रिय-सङ्गोष्ठ्यां 'कच्चानव्याकरण का वैशिष्ट्य और महत्त्व' इत्येतद् विषयमधिकृत्य शोधपत्रं प्रस्तुतवान्।
- ०४-०५.०२.२०१८ दिनाङ्कयोः 'बौद्धमिश्रितसंस्कृतसाहित्यस्य वैश्विकसन्देशः' इति विषयमधिकृत्य प्रवर्तितायां साहित्यविभागीय-अन्ताराष्ट्रिय-सङ्गोष्ठ्यां संयोजकत्वेन विषयप्रवर्तनं प्रतिवेदनप्रस्तुतिं धन्यवादज्ञापनं च कृतवान्। तत्र च 'बौद्धमिश्रितसंस्कृतसाहित्यस्य सर्वेक्षणात्मकमध्ययनं समीक्षणं च' इति विषयमाधृत्य शोधपत्रं प्रस्तुतवान्। एवमेवास्य मार्गदर्शने संयोजकत्वे च बौद्धसंस्कृतसाहित्यसंसाधनकेन्द्रं परिसरे समुद्घाटितमभूत्। सङ्गोष्ठ्यवसरे अनेन सम्पादिताः पालितिपिटकस्य अङ्गीभूताः अंगुत्तरनिकायस्य (भाग-१, २, ३, ४ इति चत्वारो भागरूपाः) चत्वारो ग्रन्थाः सङ्गोष्ठीशोधसारावली च लोकार्पिताः अभूवन्।
- ८-९.२.२०१८ दिनाङ्कयोः समायोजितायाम् आधुनिकविषयक-राष्ट्रियसङ्गोष्ठ्याम् एकस्मिन् सत्रे सत्राध्यक्षत्वं निर्व्यूढवान् तथा एकं शोधपत्रमपि प्रस्तुतवान्। एवमन्यविभागीय-राष्ट्रिय-सङ्गोष्ठीष्वपि विविधानि दायित्वानि सम्पादितवान्।
- १५-१६ फरवरी, २०१८ दिनाङ्कयोः महूस्थ-डॉ. बी.आर. आंबेडकरसामाजिकविज्ञानविश्वविद्यालये पालिविभागे विद्यापरिषत्- (Board of Studies इति)-सदस्यत्वेन एम.ए., एम.फिल. पीएच.डी.-स्तरीय-पालिविषयक-पाठ्यक्रमनिर्माणे सहभागित्वम्।
- २३-२५ फरवरी, २०१८ तमेषु दिनाङ्केषु संस्कृतचलचित्रनिर्माणकार्यशालायाः संयोजनं विहितम्।
- १७-१८ मार्च, २०१८ तमयोः दिनाङ्कयोः नागपुरे अखिलभारतीय-पालि-साहित्यसम्मेलने मुख्यातिथिभाषणं कस्यचिदेकस्य सत्रस्य आध्यक्ष्यं च विहितम्। अत्र च महाराष्ट्रशासनस्य सामाजिकन्यायमन्त्रिणः समुपस्थितौ प्राथमिकस्तरीयकक्ष्यासु पाठ्यत्वेन संस्थापयितुम् अनेन प्रणीताः सप्त पालिभाषा-ग्रन्थाः लोकार्पिताः अभूवन्।
- मध्यप्रदेशस्य बालाघाटे धम्मकाननविपस्सनाकेन्द्रे २४ मई, २०१८ तः ०२ जून, २०१८ पर्यन्तम्, अपि च नागपुरे दत्तवाडीनगरे महाप्रज्ञा-बुद्धविहारे ०४ जून, २०१८ तः १३ जून, २०१८ पर्यन्तं द्वयोः पालि-सम्भाषण-प्रशिक्षण-अध्ययनशालयोः आधारपुरुषत्वेन (Resource person इति रूपेण) प्रशिक्षणं दत्तवान्।
- अस्मिन्नवधौ पालिसंवादो-धम्मसन्देश-रघुनाथवार्तावली-सदृशीनां पत्रिकाणां सम्पादनमपि कृतवान्।

**डॉ. शैलेन्द्रप्रसाद उनियालः-**

- ०१-०२.०२.१८ दिनाङ्कयोः "वेदस्मृत्योः धर्मादिपुरुषार्थविचारः" इति विषयिण्यां दिनद्वयव्यापिन्यां राष्ट्रियवैदिकसङ्गोष्ठ्यां प्रास्ताविक-भाषणं प्रस्तूय 'यजुर्वेदीयस्वरसञ्चालनविधिः' इत्यस्मिन् विषये शोधपत्रं प्रास्तौत्।
- ०२-०३.०२.१८ दिनाङ्कयोः दिनद्वयव्यापिन्याम् अन्ताराष्ट्रियायां व्याकरणविभागीयसङ्गोष्ठ्यां 'सारस्वतवैयाकरणानुभूतिस्वरूपाचार्यस्य योगदानम्' इत्यस्मिन् विषये शोधपत्रं प्रास्तौत्।
- ४-५.०२.१८ दिनाङ्कयोः दिनद्वयव्यापिन्याम् अन्ताराष्ट्रियायां साहित्यविभागेन समायोजितायां सङ्गोष्ठ्यां 'बौद्धसंस्कृतसाहित्य-वैदिकसाहित्ययोः मौलिकं साम्यम्' इति विषयमवलम्ब्य शोधपत्रं प्रस्तुतवान्।
- ०६-०७.०२.१८ दिनाङ्कयोः दिनद्वयव्यापिन्यां राष्ट्रियज्योतिषसङ्गोष्ठ्यां 'वेदालोके ज्योतिषशास्त्रे सृष्टिविज्ञानम्' इति विषये शोधपत्रं प्रास्तौत्।
- ०८-०९.०२.१८ दिनाङ्कयोः आधुनिकविभागेन समायोजितायां दिनद्वयव्यापिन्यां राष्ट्रियसङ्गोष्ठ्यां 'नवधाभक्ति : एक ऐतिहासिक समालोचन' इति विषयमवलम्ब्य शोधपत्रं प्रस्तुतवान्।
- ०८-०९-०२.१८ दिनाङ्कयोः वेदान्तविभागेन समायोजितायां दिनद्वयव्यापिन्यां राष्ट्रियसङ्गोष्ठ्याम् 'उपनिषद्वाङ्मये ब्रह्मचिन्तनम्' इति विषयमवलम्ब्य शोधपत्रं प्रस्तुतवान्।
- १६-१७-१८०२.१८ दिनाङ्केषु महर्षिसान्दीपनिवेदविद्याप्रतिष्ठानेन श्रीभारतीपीठवेदविद्यालयेन च संयुक्तरूपेणायोजिते तैलङ्गाना- राज्ये बासरे 'क्षेत्रीयवैदिकसम्मेलने' सत्रसञ्चालनपूर्वकं विशिष्टातिथित्वेन विशिष्टव्याख्यानं प्रास्तौत्।
- २७-२८.०२.१८ दिनाङ्कयोः दिनद्वयव्यापिन्यां राष्ट्रियन्याय-सङ्गोष्ठ्यां 'वेददृशा पदवृत्तिविचारः' इति विषये शोधपत्रं प्रास्तौत्।

## मन्यसे चेद् गङ्गाऽम्बाऽहम्

(हिन्दीमूलम् - मानो तो गंगा माँ हूँ, ना मानो तो बहता पानी)

**संस्कृत-समच्छन्दोऽनुवादः-प्रो. बनमालीबिश्वालः**

मन्यसे चेद् गङ्गाऽम्बाऽहम्
नो चेत्प्रवहज्जलम्,
मन्यसे चेद् गङ्गाऽम्बाऽहम्
नो चेत्प्रवहज्जलम्।

यद् धरित्र्यै स्वर्गेण दत्तम्
यद् धरित्र्यै स्वर्गेण दत्तम्
अहमस्मि तत् प्रेमसङ्केतम्,
मन्यसे चेद् गङ्गाऽम्बाऽहम्
नो चेत्प्रवहज्जलम्।

युग-युगेभ्योऽहं वहन्त्यागता
नीलगगनस्याधस्तात्,
इयं शताब्दीभ्यो मे धारा
प्रेम्णो धरित्रीं सिञ्चेत्,
मम तरङ्गेषु विलिखिता
मम तरङ्गेषु विलिखिता
अस्य देशस्य चामरकथा
मन्यसे चेद् गङ्गाऽम्बाऽहम्
नो चेत्प्रवहज्जलम्।
हरिः ओम्, हरिः ओम्
अल्ला भोः, अल्ला भोः
हरिः ओम्, हरिः ओम्



कश्चिन्मुखं क्षालयेन्मज्जलेन
कश्चिन्मुखं क्षालयेन्मज्जलेन
कश्चित् स्नापयेच्च सुप्रतिमाः,
क्वचिद्रजकः क्षालयेद् वस्त्रम्
(चर्मकारश्च क्षालयेत् चर्म)
क्वचित् पण्डितः शामयेत् तृषाम्
जातिधर्मयोरयं कलहः
जातिधर्मयोरयं कलहः
अस्ति मानवस्य चाज्ञानता,
मन्यसे चेद् गङ्गाऽम्बाऽहम्
नो चेत्प्रवहज्जलम्।
हर हर गङ्गे, हर हर गङ्गे,
हर हर गङ्गे।

गौतमाशोक-आकवरैः
विकसितमत्र प्रेमपुष्पम्
तुलसी-गालिब-मीराभिः
ज्ञानदीपोऽत्र प्रज्वालितः,
मम तटेऽद्यापि गुञ्जेत्
मम तटेऽद्यापि गुञ्जेत्
नानक-कबीरयोः वाणी,
मन्यसे चेद् गङ्गाऽम्बाऽहम्
नो चेत्प्रवहज्जलम्।

## अन्ताराष्ट्रिय-व्याकरणसङ्गोष्ठी-पञ्चकम्

**प्रो. बनमालीबिश्वालः**

श्रीरघुनाथकीर्त्याख्ये यूनि परिसरे शुभे।
व्याकरणविभागीया सङ्गोष्ठी द्विदिनात्मिका॥१॥

सा चान्ताराष्ट्रिया गोष्ठी विचारान् विदुषां नवान्।
ख्यापयिष्यति लोकेस्मिन् बौद्धव्याकरणाश्रितान्॥२॥

पक्षविपक्षसम्मिश्रान् निर्मथ्य युक्तिसङ्गतान्।
स्थापयिष्यति सिद्धान्तान् नवनीतसमांश्च कान्॥३॥

सन्ति व्याकरणे शास्त्रे सुमहत्यः परम्पराः।
बौद्धपरम्परायां तु सङ्गोष्ठीयं विशिष्यते॥४॥

विदुषां समधीतीनां नवशोधैकचक्षुषाम्।
सङ्गोष्ठी चाद्वितीयेयं सिद्ध्यतां मार्गदर्शिका॥५॥

## श्रीरघुनाथकीर्तिपञ्चकम्

**डा. शैलेन्द्रप्रसाद उनियालः**

सङ्गोष्ठीं तनुते ह्ययं परिसरः भर्गश्च देवो वरः
स्वर्गः सर्वगवर्गध्वंसकरणः पायात्स वेदो जनान्।
दौष्ट्याद्दुर्मददुःखदैन्यदुरिताद्दौस्थ्याच्च दुःसङ्गतात्
पायात्पातकवंशतोंऽशुशरणः श्रीवेदवेद्यो महान्।।१।।

सत्ये शौचदयादिधर्मविषये निष्ठाऽस्तु चिन्निर्मला
नित्यानन्दयुता जनाः सुकृतिनः श्रीवेदवेदाङ्गतः।
आत्माऽयं तु सुनिर्मलमिदं ब्रह्मैव नैव द्वयं
दृष्टिं स्तम्भय मा भयादिषु शयः मुक्तौ च धर्मे जयः।।२।।

जन्तूनां नरजन्मदुर्लभमतः स्वार्थं ततश्चिन्तय
भोग्यं वस्तु तु जन्मजन्मनि सदा प्राप्तन्नु चित्रं हि किम्।
भक्तिं शक्तिपुरस्सरं धर नर भक्त्या तरेद्वै जनः
प्रह्लादञ्च ध्रुवञ्च कश्यपसुत भक्त्या प्रभुः स्वीकृतः।।३।।

विश्वस्मिन्हि स्वराष्ट्रगौरवमयी गाथा भवेन्निर्मला
शास्त्राभ्यासयुतं तु शैशववयः लक्ष्म्यर्जने यौवनं।
वार्धक्ये मुनिवृत्तिभिस्तु समयः स्यात्संस्मयो जीवनं
सर्व वै रघुनाथकीर्तिरतुलं वार्त्तावली गीयताम् ।।४।।

नानाशास्त्रविचारसारसुखदां वार्त्तां तु विज्ञानदां
देशे राज्यजने जने जनपदे ग्रामे च हर्म्ये शुभे।
भूयाद्भारतसंस्कृतेश्च सुरभेर्मानं तथा वैभवं
नित्यं वै जयताद्धि विश्वविजयो नाथो रघूणामिनः।।५।।

# कवितैका मद्राष्ट्रस्य कृते

## (A poem for my country)

अंग्रेजीमूलम्–प्रो. सुशीलकुमारशर्मा
संस्कृतानुवादः–प्रो. बनमालीबिश्वालः

अप्यहं भारतीयोऽस्मि देशो मे भारतम्
नास्ति मम भारतीय-निर्वाचन-परिचयपत्रम्
गर्वितः स्यां येन परिचयप्रमाणीकरणे?

मया दृष्टः देशस्यास्य प्रस्थस्तथा दीर्घः
विद्यालय-विश्वमानचित्रम्
अन्यथाऽहं दृष्टवान् स्याम्
मत्पादयोरधोगता भूमिः।

मन्ये संघर्षशीला सा
स्वबालानां कृते
समुद्रोऽस्ति त्रिषु च पार्श्वेषु
अथवा स्याद् द्वयोश्च पार्श्वयोः।

विश्वासकाः विविध-आस्थानाम्
प्रयोक्तारः पुनर्बहु-रसनानाम्।

असंख्याकप्रकारक-खाद्यानाम् अत्तारः
जीवनं हि सहास्तित्वे
न प्राचीनं ध्येयवाक्यमेव
किन्तु कश्चिन्मन्त्रः
अभ्यस्यते चैकेनाथ सर्वैः।

सत्याय जीवनम्
जीवनं च सत्यस्य छायायै
निर्मात्येकं महाविद्यालयम्
विविधाभिः वर्णिलच्छटाभिः।

नैव कश्चिदपरिचितोऽत्र
न च परिदधात्यसौ आतपोपनेत्रम्
भवितुं निष्क्रियो द्रष्टा दुःखार्त-दृश्यस्य
आशा-ह्रदः भासमान उपद्वीपः जलेऽस्ति निमग्नः।

क्षेत्रमर्पयति तुभ्यं दृश्यमेकं त्वदीयाभिरुचेः–
बालकं क्रन्दनशीलं, मातरञ्च निराश्रिताम् उन्नग्नं फकीरं
बुभुक्षुं कृषकं, गृहहीनमभियान्त्रिकं च
मद्यपं जनकं, निःशुल्कम् आवासम्
निःशुल्कञ्च पंक्तिभोजं याचतेऽत्र सानुनयं रिक्तोदरं किञ्चित्
प्रवचनं परमात्माऽऽत्मनोः, इहलोक-परलोकयोश्च।

मेट्रो-रेलयानं, खचुम्बि भवनम्, अन्तरीक्ष-उपग्रहः
चलदूरभाष-क्रान्तिः, शैक्षणिकः कृत्रिमोपग्रहः।

हसाम्यहम्
अवदमाम्यहम्
अहमवरुणध्मि च निःश्वास-प्रश्वासौ
मम देशपर्यटकः अनुभवेदसहजां स्थितिम्।

स्वस्य राष्ट्रमभिदधाम्यहं मदीया मातृभूरिति
न मे पितृभूमिः
किमर्थं न जाने!

Am I an Indian and my country India
Doesn't the Indian voter Identity card
That I flaunt prove this?

I have seen the length and the breadth
Of this country in
A school atlas
Otherwise I have just seen
The ground beneath my feet,

It appears to be fighting,
For its children,
The sea on the three sides,
Or is it just two?

Believers of various faiths
Users of so many tongues
Eaters of countless varieties of food
Life in co-existence is
Not an ancient slogan only
But a mantra
Practiced by one and all.

Life for truth and
The life for shadows of truth
Form a college along with
Shades of various hues.

There is no stranger here
That does not wear a sunglass
To be a passive spectator of sorrowful sight
The lake isle of hope is drowned.

The land offers you a sight of your choice—
A weeping child, destitute mother, naked faqir
Hungry farmer, homeless engineer,
Drug-addict father, free boarding house,
Free longar beseeching an empty belly,
A discourse on self and soul, this world and that world.

Metro rail, sky – scrapers, space shuttles,
Mobile revolution, educational satellites.

I laugh
I stifle
I choke
Lest my country visitor
Should feel awkward.

I call my country my motherland
And not my fatherland
I don't know, why!



# सङ्गोष्ठी-चित्रमालिका



Raghunathavartavali : Quarterly News Bulletin of Shri Raghunath Kirti Campus of Rashtriya Sanskrit Sansthan, Published by the Principal for Shri Raghunath Kirti Campus, Devaprayag, Uttarakhand & Printed at D.V. Printers, 97_U.B., Jawahar Nagar, Delhi-110007